ISSN : 2347-1565

मूल्यम् ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ दिसम्बरः २०१७ अङ्कः-५

( मार्गशीर्ष शु० द्वादशी तः पौष शु० त्रयोदशी पर्यन्तम् वै. २०७४ )

सम्पादकः

डॉ० जीतराम भट्टः

सचिवः

सहायक सम्पादक

प्रद्युम्नचन्द्रः

दिल्ली संस्कृत अकादमी

( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२, २३६६८१८३५, २३६३७७९८

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (**दिल्लीसंस्कृतअकादमीपक्षे**)

Mode of payment:

Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

अयि संस्कृतं सेवमानास्तत्र भवन्तो भवत्यश्च जानन्त्येव यद् यद्यपि यल्लोकाचारस्य व्यवस्था प्रशासनेन नियन्त्रिता भवति तथापि शिक्षा-साहित्य-संस्कृति-कलाभिरपि लोकः सदाचारणायभिप्रेर्यते। कतिचन विषयाः सन्ति येषां कृते शासने तादृशाः नियमाः नहि भवितुं शक्नुवन्ति। यथा प्रेम, साहचर्यं सन्निधिः निष्ठा, श्रद्धा, सात्त्विकाः भावाश्च। एतेभ्यस्तु शिक्षयैव मानवेषु संस्काराः स्थापनीयाः भवन्ति। प्राचीनकालादेव 'मनुर्भव' इत्युद्घोषणया मानवस्य संस्कर्तुं प्रयत्नः प्रारब्धोऽस्ति। वेदोपनिषदादिग्रन्थेभ्यः प्रभृतिराधुनिकसाहित्यपर्यन्तं सदयहृदयाः साहित्यकाराः मानवतायाः प्रसारायैव प्रवृत्ताः सन्ति। औपचारिकशिक्षया सदैव गृहे, लोके सामाजिकसंगठनेषु जायमानव्यवहारोऽपि शिक्षायाः स्रोतो भवति। अग्रजान् मान्यान् वरिष्ठाञ्च दृष्ट्वा लोकः तेषां व्यवहारमनुकरोति। अतः संस्कारसंवर्धनाय च संस्कृतिरक्षणाय निवेदयत्ययं जनः।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदकः**
**डॉ. जीतरामभट्टः**
**सचिवः**

# अनुक्रमणिका 'संस्कृत चन्द्रिका'


| क्र.सं. | अनुक्रमणिका | पृ.सं. |
|---|---|---|
| | **सम्पादकीयम्** | |
| | **डॉ0 जीतराम भट्ट:** | |
| १. | **मम जननी** | १ |
| | –डॉ० हेमचन्द्रबेलबाल: 'हिमाशु: | |
| २. | **मेघा शुष्का जाता:** | ५ |
| | –डॉ0 केशवराम: शर्मा | |
| ३. | **प्राचेतस: प्रवीण:** | ६ |
| | –डॉ0 कैलाशनाथ: द्विवेदी | |
| ४. | **श्रीगुरु शरणम्** | ८ |
| | –डॉ0 वेणीमाधव: शास्त्री | |
| ५. | **क्षणिका–७** | १० |
| | – डॉ0 शुकदेव शर्मा | |
| ६. | **को निर्धन:** | १२ |
| | –डॉ0 शशि तिवारी | |
| ७. | **बालगीतम्** | १४ |
| | –आचार्या अनिता भार्गव: | |
| ८. | **मानवधर्म:** | १५ |
| | –अंजुबाला | |
| ९. | **घनवृष्टिकाले** | १८ |
| | –रामशङ्कर: अवस्थी | |
| १०. | **मा कुरु व्यर्थं जलं** | १९ |
| | –मोती प्रसाद साहू | |

# मम जननी

-डॉ. हेमचन्द्रबेलवालः 'हिमाशुः'

अतिसरला मम जननी
बहुसुखदा मम जननी,
प्रियवचना मम जननी
हसितमुखा मम जननी।।१।।

भजति विभुं मम जननी
भजती हरिं मम जननी,
भजति शिवं मम जननी
भजनरता मम जननी।।२।।

अधिकगुणा मम जननी
त्रुटिरहिता मम जननी,
पितृपदगा मम जननी
पठति मया मम जननी।।३।।

श्रमनिरता मम जननी
पचति सदा मम जननी,
विविधकला मम जननी
लसतितरां मम जननी।।४।।

विगतभया मम जननी
भृशमचला मम जननी,
भुवनमणिर्मम जननी
सफलजनिर्मम जननी।।५।।

**– सहायक अध्यापकः,**
**संस्कृत राजकीय उच्चमाध्यमिक विद्यालयः**
**घसाड, पो० विनायकम् ( मुवानी )**
**जिला-पिथौड़ागढम्, उत्तराखण्डः**

# मेघाः शुष्का जाताः

-डॉ0 केशवरामः शर्मा

गोविन्दपुर इत्याख्यस्य लघुग्रामस्य बहिर्निर्मित एकस्मिन्शिवमन्दिरे महात्मा शिवानन्दः स्वपञ्चभिः शिष्यैः सह निवसति। तस्मिन्मन्दिरे नियमितरूपेण त्रिकालपूजनं यदा-कदा कथा कीर्तनादि च भवन्ति, महात्मा विशेषेण शिक्षितो नास्ति, किन्तु श्रेष्ठसाधको व्यवहारेण मधुरश्चास्ति। ग्रामवासिनस्तस्य सम्मानं कुर्वन्ति। उपार्जितास्यान्नस्य निश्चितांशञ्च मन्दिराय समर्पयन्ति। प्रायो महात्मनां भोजनस्य व्यवस्था यत्र-तत्र भवति तथापि तेषां। पृथक्शो भोजनालयोऽप्यस्ति।

एकस्मिन्वर्षे वर्षाकालेऽपि वर्षाया नितरामभावोऽभवत्। जलभावेन ग्रामेऽकालसदृशी स्थितिर्जाता। यत्र ग्रामवासिनः स्वभोजनस्यैव यथा-तथा व्यवस्थां कुर्वन्ति, तत्र दानपुण्यस्य का कथा? महात्मनां भोजनस्य व्यवस्था कष्टसाध्याभवत्।

एकदा रामसिंहो नामको कृषकः आगत्य दीनभावेन् गुरु चरणयोः प्रणमति। करबद्धः स तं वर्षायोगं पृच्छति, गुरुणोक्तं वर्षायोगस्तु यत्र-तत्रैवास्ति। तद् योगोऽपि स्वल्प एवास्ति।

**कृषकः**:- हे विज्ञवर! मम एकस्य धान्यक्षेत्रस्य सिञ्चनं यदि क्षिप्रमेव न भवति, तदा सर्वमेव नष्टं भविष्यति।

(रमेशोऽपि दत्तकर्णस्तयोर्वार्तालापं श्रृणोति। स सहसा एव प्रविशति)

**रमेशः**:- किं त्वं सरोवरतट स्थितस्य धान्यस्य लघुक्षेत्रस्य विषये चिन्तातुरोऽसि ?

**रामसिंहः**:- आम् श्रीमन् ? सरोवरस्य दक्षिणतटवर्ति तल्लघुक्षेत्रमेव मम चिन्तायाः कारणमस्ति। यदि कीदृशेनापि पूजापाठेन वर्षायोगः सम्भवो भवेत्, अहं तन्निमित्तमपि प्रस्तुतोऽस्मि।

**रमेशः**:-गुरुदेव! असौ त्वस्माकं प्रतिवेश्यस्ति। कृपया कथमपि अस्य सङ्कटस्य निवारणं चिन्तनीयम्।

**शिवानन्दः**- (पञ्चाङ्गमुद्घाट्य कामपि गणनां करोति। पञ्चाङ्गञ्च यतस्तत उद्घाट्यति। प्रसन्नो भूत्वा) त्वं भाग्यवानसि श्व एव बृहस्पतिवारो दशमीतिथिः श्रवणनक्षत्रश्चास्ति, असौ सिद्धियोगः परमश्रेष्ठोऽस्ति। एतादृशे योगे कृतकार्यं शीघ्रफलदायकं भवति। त्वं प्रातोऽष्टवादनेवेलायां हवनकार्यस्यायोजनं कुरु । प्रसादस्यास्माकं भोजनस्य च व्यवस्थापि करणीया। रमेशस्त्वां सर्वं सविस्तरं कथयिष्यति।

**रमेशः**- आगच्छतु भवान्मया सह। (उभौ गच्छतः।)

निश्चित तिथ्यां रामसिंहस्य गृहे हवनकार्यस्यायोजनं भवति। सर्वे महात्मनो दीर्घकालानन्तरं यथेच्छं स्वादिष्टभोजनं गृह्णन्ति यथोचितदक्षिणामपि लभन्ते च। द्वौ शिष्यौ मन्दिर एव आस्तां, तयोर्व्याजेन ताभ्यः सायंकालीनभोजनस्यापि सुष्ठुव्यवस्था जाता।

सर्वे शिष्या गुरुदेवस्य रमेशस्य च बुद्धिमत्तायाः प्रशंसां कुर्वन्ति। तस्मिन्दिने सायंकालीनं सन्ध्यावन्दनमप्यतिविनम्रतया श्रद्धाभावेन च क्रीयते। सर्वैः सामूहिरूपेण आशुतोषशङ्करं प्रार्थितं यत्तेषां कल्याणाय तस्मिन्ग्रामेऽवश्यमेव वर्षा भवेत्, किन्त्वाशुतोषोऽपि क्रूर एवासीत् शनैः शनैर्नववादनवेलाआगता। भाव्यनिष्टस्य भयाच्छिवानन्दः स्वशिष्यान्कथयति-" चतुरवादनवेलातः पूर्वमेव अस्माभिस्तस्य क्षेत्रस्य सिञ्चनं करणीयम्, अन्यथा रामसिंहस्य कोपात्सर्वे ग्रामीणाः परिचिता एव। सर्वेऽपि कलशान् गृहीत्वा तस्य क्षेत्रस्य यथाशीघ्रं सिञ्चनं कुर्वन्तु।" यथा-तथा सर्वेषां कठिनश्रमेण तस्य क्षेत्रस्य सिञ्चनमभवत्।

निशायाः कठिनश्रमेण श्रान्ताः सर्वे शिष्या अष्टवादनवेलापर्यन्तमपि प्रगाढनिद्राया सुप्ता आसन्। सहसा सामसिंहो मन्दिरे प्रविशति। स च " उदरम्भरि! वञ्चक! लुण्ठक! मिथ्याचारिन्! इत्यादिभिर्दुर्वचनैर्ममहात्मनोऽपयानं करोति।

शिवानन्दः शान्तभावेन पृच्छति-रामसिंह! त्वं सुशिक्षितः सम्भ्रान्तः कुलीनो भूत्वापि ईदृशमशिष्टव्यवहारं कथं करोषि?

**रामसिंहः** -(सक्रोधम्) कुतो गतस्तव वर्षायोगः ? सुयोगो विचार्य त्वया हवनकार्यं कृतम्। मया त्वयि विश्वस्य श्रद्धाभावेन हवन कार्यं कृतं युष्माकं भोजनस्यापि सुष्ठुव्यवस्था कृता, युष्मभ्यमुचित दक्षिणा दत्ताः, सांयकालीन भोजनमपि यथेष्टं दत्तम्। एतत्सर्वं निष्फलं जातम्। वर्षाया एको विन्दुरपि भूमौ न पतितः। किं त्वं मिथ्याचार्युदरम्भरी च नास्ति?

**शिवानन्दः**:- (शान्तभावेन) मया पूर्वमेव कथितमासीत्, यत् वर्षायोगोऽत्यल्पोऽस्ति, तच्च यत्र-तत्रैव भाग्यवशात् सम्भवोऽस्ति। त्वया तस्य क्षेत्रस्य निमित्तमेव तत् सर्वमायोजनं कृतम्। अस्कामं सर्वे प्रयासा अपि तस्य रक्षणायैवासन्। स्वक्षेत्रं गत्वा पश्यास्माकं प्रयासाः कदापि निष्फला न भवन्ति।

यदा रामसिंहः स्वक्षेत्रं गत्वा पश्यति, तदा तस्मिान्धान्यस्य स्थिति दृष्ट्वा तस्य हर्षस्य सीमा नासीत्। सर्वं क्षेत्रं जलपूर्णमासीत्। स महात्मानं साष्टाङ्गं प्रणम्य क्षमायाचनां करोति। उत्फुल्लहृदयेन च स्वगृहं गच्छति।

सर्वे ग्रामवासिन इमामद्भुतवर्षां दृष्ट्वा अस्य रहस्यञ्च विचार्य मन्त्रमुग्धा आसन्। तस्य सवोवरस्य तट एव लक्ष्मणसिंहस्यापि क्षेत्रमस्ति। सोऽपि सायंकाले मन्दिरं गच्छति। विनम्रभावेन महात्मानं प्रणम्य निवेदयति- ''महाराज! मम क्षेत्रमपि तस्य सरोवरस्य तट एवास्ति। जलाभावेन तस्य धान्यमपि शुष्कप्रायमस्ति। कृपया श्व एव मम गृहेऽपि हवनकार्यं कृत्वा मामनुगृहीतं कुरु।

अहमपि भवद्भ्यो भोजनस्य व्यवस्थां करिष्यामि, मन्दिराय यथोचितं दानं दास्यामि, भवद्भ्यो दक्षिणां वस्त्रादिकञ्च समर्पयामि। कृपया शीघ्रमेव मम क्षेत्रेऽपि वर्षायोगस्य व्यवस्थां कृत्वा मम कल्याणं कुरु।

(सर्वे शिष्याः सावधानमनसा तयोः संवादं शृण्वन्ति।)

**रमेशः**:-(सहसा प्रविश्य) गुरुदेव! कृपया सुविचार्य एव मुहूर्तस्य चयनं करणीयम्, यतो हि ह्यः सर्वे मेघाः शुष्का जाताः।

**शिवानन्दः**:-(लक्ष्मण सिहं प्रति) अहं सुविचार्य एव मुहूर्तस्य निर्धारणं करिष्यामि कृपया भवान् इदानीं स्वगृहं गच्छतु।

हताशो लक्ष्मणसिंहस्तान् सर्वानृ शिष्यान् नैराश्यभावेन पश्यन् शनैः शनैर्बहिर्गच्छति।

**-पूर्वोपाचार्यो हिन्दी विभागाध्यक्षः**
**शोधकेन्द्राध्यक्षश्च**
**बी-५-६, वीथिसङ्ख्या-३,**
**उत्तरीछज्जूपुरम्, दिल्ली-११००९८**

# प्राचेतसः प्रवीणः

–डॉ. कैलाशनाथः द्विवेदी

विद्याव्रते निलीनः प्राचेतसः प्रवीणः।
तमसा सुरम्यतीरे तपसा समृद्धत्रेता,
शरविद्धक्रौंचमार्तं दृष्ट्वा विषण्णचेता,
श्लोकत्वरूपशोकः प्रादुरभवद्द्विजेता,
श्रीरामकाव्यगाने अहमादिकविरहीनः।
विद्याव्रते निलीनः..............................(१)

तमसा विधूतपापः सुरसरिसुपावितोऽयम्,
वनराजिमध्यवर्ती सुषमामयाश्रमोऽयम्
पशुपक्षिणोऽपि प्रीत्या पार्श्वे प्रमोदिनो मम्,
प्रकृतेः प्रशान्तप्राङ्गणपरिवर्धितो न दीनः।
विद्याव्रते निलीनः................................(२)

योगे गतिर्मदीया भोगे रुचिर्न दृष्टा,
अनुशासनेऽस्मदीये प्रकृतिः सदैव हृष्टा,
कर्त्तव्यपालने न काचित् कदापि क्रुष्टा,
नवसृष्टिरंगमंचे सर्वत्र कर्मलीनः!
विद्याव्रते निलीनः................................(३)

मिथिलेशकन्यकेयं संरक्षिताऽतिप्रीत्या,
मम आश्रमस्य पार्श्वे पत्योज्झिताऽतिभीत्या,
वात्सल्यभावसुधिया सा पालिता सुनीत्या,
धर्मपितृरूपे नाऽहं कदापि हीनः!
विद्याव्रते निलीनः......................................(४)

मम काव्यसिद्धिलभ्यमाभूषणं समस्तम्,
प्रकृतिश्रिया प्रदत्तं शुभकर्मसाधनत्वम्
प्रभ्वाशिषा शुभेन दुरितं तमो निरस्तम्,
श्रीरामकाव्यपुष्टो मनसैव नास्मि क्षीणः।
विद्याव्रते निलीनः..............................(५)

हृत्प्राणभूतशिष्यौ हि कुशलवाविमौ मम,
विद्या-विनीत-व्रतिनौ वशवर्तिनौ सदा मम,
निर्भीक-शान्तचित्तौ आज्ञानुसारिणौ मम,
श्रीरामकाव्यपाठं तु पाठने प्रवीणः!
विद्याव्रते निलीनः............................(६)

छलछद्मशून्यचेता, नवसत्पथेन नेता,
भवबन्धनाशनेऽहं सद्धर्मपथप्रणेता,
ह्यज्ञानतमो हन्तुं स्वर्भानुरिव विजेता,
संसारसरसि लीनः सलिले ह्यलीनमीनः।
विद्याव्रते निलीनः............................(७)

प्रभु-चारु चरितगातुं गाथां पवित्रां ध्यातुम्,
मानव-मनःसि निलीनां भवपापराशिं हातुम्,
कृत्वा पवित्रहृदयं, प्रभुभक्तिभावं प्राप्तुम्,
शुचिरामनामजापं जप्तुमहं प्रवीणः।
विद्याव्रते निलीनः प्राचेतसः प्रवीणः।।(८)

**- पूर्व प्राचार्यः**
**'कुसुमकुलाय' सूर्यनगरम्,**
**अजीतमल, औरेया, उ०प्र० २०६१२१**

# श्रीगुरुः शरणम्

-डॉ0 वेणीमाधवः शास्त्री

जनगणमनअधिनायक......यह राष्ट्रगीत बंगाली भाषा में है। इसमें "अधिनायक", "भारतभाग्यविधाता" (कौन है स्पष्ट नहीं है) ऐसे एक व्यक्ति की प्रशंसा इत्यादि प्रस्तुत है।

संस्कृत भाषा में उसी धाटी में- प्रार्थनायुक्त और प्रमाणसहित एक गीत यहाँ प्रस्तुत है-

जय जय जननि सुधामयचरिते भारत जननि नमस्ते
गंगा-वन-शैल-सुसम्पद-सदनां
हिमगिरि-मुकुट-सुवदनां
सागर-सलिल-क्षालित-चरणां
वन्दे कृषिवसुधाभरणाम्।
देहि च सेवाभावं, देहि समर्पणभावं, वन्दे विजयपताकां
वितर समुन्नतिमानेतुं मे सन्मतिशक्ति शुभदेशे
जय हे जय हे जय हे जय जय जय जननि।

इस का अर्थ ऐसा है-

भारत माता की जय हो। हे भारतमाता! तेरा चरित्र अमृतमय है तुझे प्रणाम।
(हे जननी) गंगानदी, वन, शैल, आदि उत्तम संपत् भरे स्थानों का तू सदन हो
हिमगिरी तेरा वदन पे मुकुट है
सागर सलिल से तेरा चरण प्रक्षालित है।
कृषि भूमी ही तेरा आभरण है, तुझे प्रणाम।

(हे माता) मुझे सेवाभाव (समाज, देश, मातापिता, गुरुजन, अनाथ, रोगी, गो इत्यादियों की) सेवा करने की भावना या बुद्धि दे दो। देश के लिए और कर्त्तव्य के लिए समर्पणभाव दे दो, राष्ट्र ध्वज को प्रणाम। देश में उन्नति लाने के लिए मुझे सन्मति और शक्ति दे दो। जय जय जय हो जननी।

इतने विषय (भारत भूमि, प्रणाम, ध्वज, अमृतमय इतिहास) और प्रार्थनायुक्त (व्यक्तित्व विकास के अंशों से युक्त) गीत संस्कृत में है। क्या इसे राष्ट्रगीत बनाने का विचार कर सकते हैं।

**– 'भामती' बेन्द्र मार्गम्**
**साधनकेरी, धारवाडः**
**कर्नाटकः- ५८०००८**

# क्षाणिका -७

- डॉ० शुकदेवः शर्मा

## धरित्री ( पृथ्वी )

धारणाद्
धरित्री
या-
सन्धारयति सर्वं
निजक्रोडे।

## संसारः ( जगत् )

संसरणशीलः
संसारः
यः-
कदापि न तन्द्रयते
संसरन्।

## सूर्यः

कर्मशीलः
सूर्यः
यः-
सुवति प्रेरयति
कर्मणि लोकम्।
(सूर्योदये सत्येव प्राणिनः स्व-स्वकर्मणि प्रवर्तन्ते।)

## रात्रिः

दानस्वभावा
रात्रिः
या-

(रात्रौ) राति ददाति
सुखं भयं वा प्राणिभ्यः।

## निशा ( रात्रिः )

तनुकरा
निशा
या-
नितरां श्यति तनूकरोति
प्राणिनां व्यापारान्।
प्रकाशाभावो
निशा
यस्या।
निःशेषेण शाम्यन्ति
इन्द्रियाणि प्राणिनाम्।

## चन्द्रः ( चन्द्रमा )

आह्लादनात्
चन्द्रः
यः-
चन्दति आह्लादयति
निजचन्द्रिकाभिः प्राणिनः।

## चन्दनः( लेपः )

चन्द्रस्थानीयः
चन्दनः
यः-
संलिप्ते तनौ
शमयत्येव सन्तापम्।

**-साधु आश्रमः,**
**होश्यारपुरम्, पंजाबः-१४६०२१**

# को निर्धनः?

-डॉ0 शशि तिवारी

कस्यचिद् नगरस्य बाह्य प्रदेश एकस्यां कुट्यां साधुरेकः प्रतिवसति स्म। स भगवद् भजने जीवनं यापयति स्म। स्वभावेन अतिविनम्रः स यत् किञ्चिदपि भिक्षामाध्यमेन प्राप्नोति, तेनैव सन्तोषमलभत।

एकस्मिन् दिन एको हृष्टः पुष्टो भीमकायः पुरुषः साधुं निकषा गतवान्। साधुं प्रति स्वकीयमादर भावं प्रदर्श्य साष्टाङ्गप्रणामं निवेद्य स अकथयत् ''भगवन् ! अहमतीवनिर्धनोऽस्मि। अधुना मम बालका अल्पवयस्का एव सन्ति। गृहे धनं नास्ति, किमपि भोजनमपि नास्ति। मम पार्श्वे तु जीवनयापनाय काप्याजीविका नास्ति। व्यापारे मम सामर्थ्यं न विद्यते। किं कुर्याम्? कोऽपि उपायो मम बुद्धौ न स्फुरति, येन मम सर्वाश्चिन्ताः निराकृताः भवेयुः। अहं भवतः शरण आगतोऽस्मि। येन प्रकारेण मम दारिद्रयं मां परित्यज्यान्यत्र गच्छेत्, मम परिवारः सुखी सम्पन्नश्च भवेदिति कथयतु भवान्।''

तस्य मनुष्यस्य स्वस्थं शरीरं महान्तं कायञ्च दृष्ट्वा साधुना मनसि विचारितम्, '' जनोऽयमवश्यमेवालस्यस्य प्रतिमूर्तिः। निरुद्यम एवास्य सुखसौभाग्यस्य बाधकः प्रतियते।'' विचार्य किचित् तेन साधुना कथितम्, '' महोदयः कथमिमं महान्तं कायं धारयन्नपि त्वं क्षुधया पीडितोऽसि ? चिन्तनमात्रेणैव माम् आश्चर्य भवतिं तव समस्यायाा एकः प्रतिकारोऽस्ति। अहं जानामि एकं नगरम्। तस्य राजा अतीव दयालुः जनहितकारी च। स कस्यचित् कार्यस्य पूर्त्यर्थं मनुष्यस्याऽङ्गानि इच्छति। अतो हि एकस्य हस्तस्य मूल्यमेकं सहस्रं रुप्यकाणि ददाति। एवमेव मानवीय शरीरस्य मूल्यमेका कोटिः रुप्यकाणि प्रददाति। धनमिच्छता त्वया श्व एव तस्य समीपे गन्तव्यम्। एवं कस्यचिदङ्गस्य विनिमये धनं प्राप्य सुखेन जीवनस्य निर्वाहं कुरु।''

साधोः परामर्शं श्रुत्वा स पुरुषः स्तब्धोऽभवत्। किञ्चित् क्षुब्धो भूत्वा तेन

निगदितम्, ''स्वामिन्! किं कथ्यते ? शरीराङ्गाना विक्रय: ? कथमेतत् सम्भाव्यते। एवं धनप्राप्ति: कदाचिदपि सुखकरी भवितुं नार्हति। मानुषदेहस्तु अमूल्यो विद्यते। शतकोटिरुप्यकाण्यपि तस्य विनिमयेऽपर्याप्तमेव ये प्रतिभाति।''

साधु: प्रकामयहसत्। तेनोक्तम्, '' भद्र! सम्यक् विचारितं त्वया। यद्यस्ति तव समीपे शतकोटिरूप्यकमूल्यस्य शरीरं तर्हि त्वं कथं निर्धनो दीनश्च ? आलस्य जनिता अस्ति तव विवशता। तव दारिद्र्यं कृत्रिममस्ति। वस्तुतस्तु एवं धनवानेवास्ति। केवलं तव रिपुरस्ति 'आलस्यम्' । किं न श्रुतं त्वया–

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु:।**
**नास्त्युद्यमसमो बन्धु: कुर्वाणो नावसीदति।।**

आलस्यं परित्यज्य परिश्रमं कुरु। नि:संशयं सफलता तव दासी भविष्यति। तव पार्श्वे चिर सङ्गिनी व निवत्स्यति। नित्यं स्मर 'परिश्रम: सफलताया: कुञ्जिका।' कथ्यते च , ' उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी:।'

साधुवचनेन बोधित: स पुरुष उद्योगपरोऽभवत्। अनन्तरमुद्योगेनैव स आजीवनं सुखी सम्पन्नश्चावर्तत।

**– पूर्वाचार्या, संस्कृत विभागस्य**
**मैत्रेयीमहाविद्यालय:**
**दिल्ली विश्वविद्यालय:**

# बालगीतम्

- आचार्या अनिता भार्गवः

1. मत्सी जलस्य राज्ञी अस्ति।
जीवनं तस्या वारि अस्ति।
हस्तस्पर्शात्, भयं करोति,
बहिः करणात्, प्राणं त्यजति,
द्विदिनानन्तरं शीर्णा भवति।

2. उपरि व्यजनं चलति रे!
अधः शिशुः स्वपिति रे!
शयनकाले बुभुक्षा जाता
खादतु वत्स! ''मूंगफली''।।
मूगंफलौ कणं नास्ति।
अहं भवतः मातुलो नास्मि।
मातुलो गच्छति देहलीम्।
ततः आनयति बिडालीम्।
बिडाली हतवती मूषिकम्।
तदा आगच्छति पितृववसा।
सा वदति –वन्देमातरम्।
सर्वे वदन्तु–वन्देमातरम्।।

–वरिष्ठ व्याख्यात्री
हि०आ०सं०म०जांगला-रोहडू
जिला-शिमला, हि०प्र०

# मानवधर्मः

- अंजु बाला

## ( नाटकम् )

## ( प्रथमं दृश्यम् )

**स्थानम्**- विक्रमादित्यस्य राजसभा, समयः प्रभातवेला (विक्रमादित्यस्य : प्रातः काले राजसभायाम् सिंहासनम् अध्यासते।)

**द्वारपालः**- (प्रविश्य, राजोचितं प्रणम्य) जयतु देवः। रसायन-शास्त्रतत्त्वज्ञः नागार्जुननामा कश्चित् विद्वान् द्वारदेशं समागतः भवद्दर्शनञ्चाभिलषति।

**विक्रमादित्यः**- सादरं प्रवेशय।

(द्वारपाल गच्छति पुनः नागार्जुनेन सह प्रविशति)

**नागार्जुनः**- (बद्धाञ्जलिः) महाराज! अभिवादये भवन्तम्।

**विक्रमादित्यः**- आगम्यताम्, स्वागतं राजकीय-रसायनाध्यक्षाणाम् अत्र भवताम्। कः विशेषः?

**नागार्जुनः**- महाराज! भवान्तु जानात्येव रसायनशालायां कार्यबाहुल्यं वर्तते। एतद्विषये किञ्चिद् निवेदयामि। कश्चित् योग्यः कर्मचारी रसायनविभागे नियोक्तव्यः यो मदीये कार्ये सहायो भवतु ।

**विक्रमादित्यः**- अवगतं मया। श्वोऽहं द्वौ विद्वांसौ रसायनविज्ञौ भवत्समीपे प्रेषयिष्यामि। तयोः योग्यतरं सहायं वृणोतु भवान्।

## ( द्वितीयं दृश्यम् )

(नागार्जुनः रसायनशालायाम् आसन्दिकायां तिष्ठति। तत्र विद्वांसौ प्रविशतः प्रणमतः च।)

उभौ-महाराज विक्रमादित्यस्य आदेशेन भवत्सकाशं समागतौ स्वः। आवाम् आदिश्यतां

किं करणीयम् इति। (नागार्जुनः ताभ्यां एकमेकं रसायनद्रव्यं प्रयच्छति)

**नागार्जुनः**- स्वीकुरुतम् एतद् रसायनम्, गृहं नीत्वा परीक्ष्य च एतेन नवं पदार्थं निर्माय श्वो मां दर्शयतम्।

उभौ यथादेशं करिष्यावः।

(तौ रसायनं स्वीकुरुतः)

**नागार्जुनः** -शृणुतं तावत् निर्मितपदार्थस्य गुणवत्तां निरीक्ष्याहं युवयोरेकतरं सहायकरूपेण वरयिष्यामि। (उभौ प्रणम्य निर्गन्तुमिच्छतः)

क्षणं विरम्य शृणुतम् अन्यदपि किञ्चित् कथनीयं यत् युवाभ्यां राजमार्गेण गृहं प्रति गन्तव्यम्। (उभौ विद्वांसौ गृहीतरसायनौ निर्गच्छतः)

## ( तृतीयं दृश्यम् )

अपरेद्युः नागार्जुनः स्वशालायां स्वकार्यरतः अस्ति। तदैव तदभ्याशे तौ आगच्छतः। तयोरेकः प्रसन्नवदन अपरश्च उन्मनाः दृश्यते।

**नागार्जुनः**- अहो! भवन्तौ सम्प्राप्तौ। इहागत्य उपविश्यतम्।

**प्रथमः**- आचार्यवर! मया यथानिर्दिष्टं रसायनं परीक्षितम् उत्तमौषधं च विरचितम्। निरीक्ष्यताम्।

(औषधपात्रं नागार्जुनाय प्रयच्छति)

**नागार्जुनः**- (द्वितीयम् अभिलक्ष्य) किं त्वया नवीनपदार्थः न निर्मितः?

**द्वितीयः**- (बद्धाञ्जलिः) निवेदयामि आचार्यवर! मया रसायनं न परीक्षितं न चौषधं निर्मितम्, एतस्मात् खेदमनुभवामि।

**प्रथमः**- (आत्मगतम्) प्रसन्नोऽहम्, अधुना मम चयनं तु निश्चितम्।

**नागार्जुनः**- कथन्न निरीक्षितं द्रव्यम्?

**द्वितीयः**- भवदादेशानुसारं राजमार्गेण गच्छन् अहमेकं रुजार्तं कमपि तरुतले अवस्थितं जनमपश्यम्। तस्य दशा शोचनीयाऽसीत्। तदुपचाराय तं गृहम् अनयम्। सर्वं दिनं तस्यैव

परिचर्यायां निर्गतम्। किं करोमि रसायनपरीक्षणाय समयो न लब्धः।

**प्रथमः**:- (नागार्जुनं प्रति अवलोकय आत्मगतम्) अपि किमिदं आचार्यवरस्तु सास्मितं तमलिङ्गति। (नागार्जुन द्वितीयम् आलिङ्गति)

**नागार्जुनः**:- धन्योऽसि त्वम्। रुजार्तस्य परिचर्यां कुर्वता त्वया तु पुण्यं कर्म आचरितम् (प्रथमम् अभिलक्ष्य) किन्तु त्वया रुग्णस्य अवहेलना कृता।

(प्रथमः अवनतमुखः क्लान्तचित्तः तिष्ठति।)

किं जानीथाः मानवधर्मः कः? चिकित्सकस्य प्रथमः गुणः कः? श्रृणु तावत् दुःखार्तां सेवैव, नेदं मम वचः वरन् आयुर्वेदशास्त्रम इदमेव निर्दिशति। कृपापरैः महर्षिभिः प्रवर्तितमिदं शास्त्रं मानवकल्याणार्थमेव। सेवाभावनाया अभावे किमौषधैः रसायनैर्गवेषणाभिश्च।

(विक्रमादित्य रुग्णेन सह प्रविशति सर्वे उत्तिष्ठन्ति प्रणमन्ति च)

विक्रमादित्यः सत्यं वदति भवान्, भो विद्वांसौ, एषः रुग्णः न एषस्तु केवलं परीक्षार्थं राजमार्गे स्थापित आसीत्। भवतोः करुणार्द्रहृदयः चयनितः अस्माभिः।

**नागार्जुनः**:-त्वदीयं निश्छलसेवाभावं करुणाभावं च वीक्ष्य परं प्रसीदामि त्वामेव सहायं नियोजयामि।

सर्वे अनुमोदनं कुर्वन्ति।

**-भारतीय विद्या भवनम्**

**मेहता विद्ययालयः,**

**के. जी.मार्गम्, नव देहली**

# घनवृष्टिकाले

- रामशङ्कर अवस्थी

पश्यन्ति नृत्यन्ति घनं मयूराः,
हरन्ति मेघाः धरणीपिपासाम्।
भरन्ति नद्यो घनवृष्टिकाले,
धावन्ति नौकाः, सलिलं तरन्ति।
हसन्ति पुष्पाणि, लसन्ति रङ्गाः,
गुञ्जन्ति भृङ्गाः मधुपानतृप्ताः।
हरिद्धरायाः मृदुलं नवीनं
चरन्ति घासं पशवो वनेषु।।
क्षेत्राणि कर्षन्ति रसे कृषाणाः,
वपन्ति बीजानि हलेन गर्भे।
रक्षन्ति सिञ्चन्ति नवाङ्कुरान् ते
स्वेदप्रवाहेन समं जलेन।।
मीनं तडागेषु वकाः गिरन्ति,
पठन्ति भेका इव वेदमन्त्रान्।
प्रकाशकीटाः विजने भ्रमन्ति,
ज्वलन्ति दीया इव विस्मयाय।।
मालाः डयन्ते गगने खगानां,
गृह्णाति बिम्बान् जलदर्पणे भूः।
छत्राणि शीर्षे जलदाः भवन्ति,
कुर्वन्ति सह्यं तपनस्य तेजः।।

- ग्राम, पत्रालयः-औनहाँ
जनपदः- कानपुरदेहात्
उत्तरप्रदेशः-२०९२०४

# मा कुरु व्यर्थं जलं

– मोती प्रसाद साहू

ग्रामस्य बहि:स्थितस्य शिवमंदिरप्रांगणे ग्रामपंचायतस्य एका सभा आयोजिता अस्ति। सभाया: विषय: ग्रामे 'अपशिष्टजलनिस्तारणं समस्या' इत्यास्ति। येन कारणेन समये समये ग्रामवासिन: परस्परं विवदन्ति।

ग्रामस्य एक: नागरिक: यस्य नाम राजेन्द्र: उथित्वा कथयति-

प्रधामहोदय: ग्रामे बहव: जना: स्वगृहे समरसेबुल जलपम्पं स्थापितवन्त:। भवान् सम्यक्रूपेण जानाति यत् समरसेबुल जलपम्पे विद्युतऊर्जया अपि संचालनस्य विकल्प: भवति। यस्य गृहे अयं पम्पं अस्ति तस्य गृहस्य आबालवृद्धा: सर्वे एव एकैकश: विद्युतऊर्जया मुखं, पादं, हस्तं च प्रक्षालयन्ति, स्नानं अपि कुर्वन्ति। येन कारणेन ग्रामस्य मध्ये जलनिष्कासन समस्या समुत्पन्ना। विथिका: विनष्टा:। आवागमनं सुगम: नास्ति। अस्य समस्याया: निदानं आवश्यकम्।

ग्रामस्य एका भुक्तभोगी महिला यस्या: नाम गीता उथित्वा आक्रोशेन कथनं प्रारब्धवती।

महोदय: मम प्रतिवेशी जनार्दन सिंहस्य पत्नी विद्युतऊर्जया एव महिषी: स्नापयति। तस्या: पुत्र: स्कूटरयानं प्रक्षालयति दंतधावनमपि च करोति। सर्वं जलं मम द्वारे आगत्वा प्रवहति। यदा अहं तां विथिकां स्वच्छाय निवेदनं करोमि तदा मया सह विवदति कथयति च 'अहं तव सेविकास्मि'। मम उपरि तर्जनं कृत्वा कथयति त्वं किम् न समरसेबुलं स्वगृहे स्थापयसि? इमां धनस्य अहंकार: अस्ति।

इदं श्रुत्वा जनार्दन सिंहस्य पुत्र: कथयति। अयं एक: विज्ञानस्य उपलब्धि: अस्मिन् कोऽपि किं करिष्यति। क: परिश्रमं कर्तुं वाञ्छति?

तस्य माता अपि पुत्रस्य समर्थनं करोति गीतायै अपशब्दं-वदति च।

इत्थमेव ग्रामस्य अन्यजनाः अपि जलस्य अपव्ययविषये विचारं स्थापयन्ति। ग्रामसभापतिः सर्वेषां विचारणां ध्यानेन अश्रुणोत्। अन्ते समस्यायाः निदानं अकथयत्-

यः यः ग्रामस्य समस्यायाः सभामध्ये अवर्णयत् तस्याशयः अयं अस्ति यत् मम ग्रामे जलस्य दुरुपयोगः भवति। इदं उचितं नास्ति। जलं विश्वस्य संपदा। अयं जीवेभ्यः प्रकृत्याः अमूल्यवरदानं । अल्पसमयपूर्वं एव जनाः कूपात् जलं आनयन्ति स्म। तदा आवश्यक मात्रायां एव जलं व्ययं कुर्वन्ति स्म। तदानीं अपशिष्टं जलं निष्कासनसमस्या नासीत्। समरसेबुलेन भूजलस्य दोहनं दंत धावनार्थाय, स्नानार्थाय पादप्रक्षालनार्थाय नास्ति। कश्चित् भाण्डे जलं गृहीत्वा एव दैनिक कार्यं सम्पादयिष्येत्। उ।र्जया उपयोगेन जलं व्यर्थं भवति। अनेन जलेन एव विथिकाः पंकयुक्ताः भवन्ति। आवागमनं अवरुद्धः भवति। प्रतिवेशिना सह विवादं भवति। व्यर्थ रूपेण जलप्रवाहं न शोभते। केवलं वृहद् कार्याय एव ऊर्जां प्रयोगं उचितं भवति। सीमित मात्रायां जल उपयोगेन केवलं जल संरक्षणं न भवति अपितु जलनिष्कासन विथिकानां पंकसमस्या पर्यावरणप्रदूषणं मशकानां प्रकोपादि च स्वयमेव समाप्तः भवन्ति। यत्र अस्मिन् संसारे बहवः जनाः स्वच्छ जलेन वञ्चिताः सन्ति तत्र स्वच्छ जलस्य दुरुपयोगं पापकर्मः अस्ति।''

ग्राम प्रधानस्य विचारं श्रुत्वा सर्वे उपस्थित जनाः 'साधु' 'साधु' इति उद्घोषं अकुर्वन्।

ग्रामप्रधानः पुनः अवदत्-

''अद्य मार्चमासस्य द्वाविंशति दिनांकः अद्य विश्वजलदिवसः अस्मिन्कारणेन अयं आवश्यक सभा अद्यैव आयोजिता । आगच्छन्तु वयं शपथं करवाम यत् भविष्ये कदापि जलस्य दुरुपयोगं न करिष्यामः।''

सर्वे तादृशं कुर्वन्ति।

**- रा० इ० का० हवालबागः**

**अल्मोडा, उत्तराखण्डः-२६३६३६**



RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।